# आचार्यप्रथमवर्षम्

## पञ्चमपत्रम्- नव्यव्याकरणम्

## शैक्षिकनिष्पत्तिः

आचार्यप्रथमवर्षस्य सर्वेषां छात्राणां कृते पञ्चमपत्ररूपेणांशद्वये वैदिकवाङ्मयेतिहासः भारतीया संस्कृतिः च पाठ्यक्रमे निर्धारिते वर्तते। वैदिकं वाङ्मयं सुविस्तृतं वर्तते। तत्र अखिलमपि ज्ञानविज्ञाने निहिते वर्तते। अतः तेषां सारभूतं ज्ञानं सत्रार्द्ध द्वये छात्रेभ्यः आवश्यकम् इति मत्वा सर्वेषाम् आचार्य कक्षाध्येतृणं कृते पाठ्यक्रमे निर्धारितः। अस्य अध्ययनस्य उद्देश्यानि अधोलिखितानि सन्ति –

- सर्वविधज्ञाननिधीनां वेदानां महत्त्वं छात्रैः वेदनीयम्।
- वेदानां चतुर्धाविभागस्य औचित्यं तत्र वर्ण्यविषयाणा संक्षिप्तपरिचयज्ञानम्।
- संहिताब्राह्मणारण्यकोपनिवदां महत्त्वपरिज्ञानपूर्वकं तत्र पारस्परिक संवन्धज्ञानम्।
- वेदाङ्गानां महत्त्वं प्राचीनकालादारभ्य अद्यावधि भविष्यति काले च तस्य समाजोपयोगित्वं व्यावहारिकत्वं च।
- भारतीयसंस्कृतिः ज्ञानम्। तत्र संस्कृतस्योपयोगित्वम्। संस्काराणां महत्त्वपरिज्ञानं तेषां लोकोपयोगित्वं च।
- वर्णाश्रमव्यवस्थायाः परिचयः। वर्तमान सन्दर्भे आश्रमव्यवस्थायाः उपयोगित्वं च।
- पुरुषार्थचतुष्टय परिज्ञानम्, पञ्चमहायज्ञानां ज्ञानम्, भाषापरिवारविज्ञानम्, ध्वनिविज्ञानम् अर्थविज्ञानं च। भाषाविज्ञानदृष्ट्या एतेषां विषयाणां परिज्ञानम्।